दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठशुक्लदशमी
ज्येष्ठ 11 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-212 | 1 | मई 25, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 HP PANCHAYAT ELECTION- पुनर्गणनार्थं (रिकाउंटिंग) १० निमेषाणाम् अभ्यन्तरे लिखितरूपेण करणीयं भविष्यति आवेदनम्, मार्गदर्शिका निर्गता

3 प्रो. शिवशङ्करमिश्रः "श्रीरङ्गलक्ष्मी आदर्शसंस्कृतमहाविद्यालयस्य, वृन्दावनस्य" प्रबन्धसमितेः अध्यक्षपदे नियुक्तः

5 कृत्रिमबुद्धिमत्ताधारित- भविष्यदिशि प्रगच्छन् बिहारः "बिहार-कृत्रिमबुद्धिमत्ता-समागमः २०२६" उत्साहपूर्णेन वातावरणेन सम्पन्नः

## भारत-अमेरिकयोः सहभागिता व्यापार-ऊर्जा-गतिशीलता-क्षेत्रीयसुरक्षा-क्षेत्रेषु विशेषरूपेण अस्ति- विदेशमन्त्री जयशङ्करः



**हिमसंस्कृतवार्ता।** एस जयशंकरः मार्को रूबियो चोभी नवदिल्ली-नगरे अनेकविषयेषु चर्चा अकुरुताम्। उभौ भारत-अमरीका-सामरिक-सहभागितां महत्त्वपूर्णाम् अवदताम्। ताभ्यां उक्तं यत् एषा सहभागिता व्यापार-ऊर्जा-गतिशीलता-क्षेत्रीयसुरक्षा-क्षेत्रेषु विशेषरूपेण अस्ति। डॉ. जयशंकरः अवदत् यत् भारतस्य अमरीकादेशेन सह व्यापकः वैश्विकः सामरिक-सहभागित्वसम्बन्धः अस्ति, यः गहनसहयोगे आधारितः अस्ति। सः उक्तवान् यत् उभयोः देशयोः सम्बन्धाः सम्पूर्णविश्वे प्रभावं जनयन्ति तथा च अनेकेषु क्षेत्रेषु तयोः हितानि समानानि सन्ति। विदेशमन्त्री उक्तवान् यत् एषा वर्तमानचर्चा कठिन-वैश्विकपरिस्थितिषु अभवत्, परञ्च तस्मै मुक्तमनसा सार्थका चर्चा भविष्यति इति विश्वासः अस्ति। सः उक्तवान् यत् उभयोः देशयोः मध्ये व्यापारसंघेः शीघ्रमेव अन्तिमरूपेण निर्धारणं आवश्यकम् अस्ति। तेन ऊर्जाव्यापारे जातस्य विस्तारस्य स्वागतं कृतम् तथा च उक्तम् यत् विविधस्रोतेभ्यः ऊर्जायाः आपूर्तिः भारतस्य ऊर्जा-सुरक्षायै अत्यावश्यकी वर्त्तते। एस जयशंकरः जनसम्बन्धानां महत्त्वं प्रतिपादयन् अवदत् यत् वैधानिक आवागमने प्रतिकूलः प्रभावः न भवेत्। सः संवादं कूटनीतिं च तथा सुरक्षितं निर्बाधं च सामुद्रिक-व्यापारं प्रति भारतस्य दृष्टिकोणं पुनः प्रतिपादितवान्। ईरान-संघर्षस्य विषये श्रीजयशङ्करः अवदत् यत् वैश्विक ऊर्जा-मूल्यानि स्थापयितुं निर्बाध-व्यापारं सुनिश्चितं कर्तुं च भारतस्य संयुक्त-राज्य-अमेरिकादेशयोः च समानानि हितानि सन्ति। मार्को रुबियो उक्तवान् यत् सहभागितायाः रणनीतिक-पक्षं महत्त्वपूर्णं मन्यमानः भारतं विश्वे संयुक्त राज्य अमेरिकादेशस्य प्रमुखतमेषु सहभागिषु अन्यतमम् इति। सः अवदत् यत् उभौ देशौ आतंकवादस्य कारणेन दुःखम् अनुभूतवन्तौ। भारतम् अमेरिका च तेषु सर्वेषु प्रमुखविषयेषु रणनीतिकरूपेण एकमतौ स्तः ये नूतन-शताब्दीं परिभाषयिष्यन्ति। अमेरिकादेशस्य विदेशमन्त्री मार्को रुबियो चतुर्दिवसीयायाः यात्रायाः कृते ह्यः भारतम् आगतः। सः अस्य मासस्य षडविंशतिः दिनाङ्के आयोज्यमानायां क्वाड-विदेशमन्त्रिणां सभायां भागं ग्रहीष्यति।

## भारतीय जनता पार्टीति दलस्य प्रत्याशी देबाङ्शु-पाण्डा इत्येषः, फाल्टा-विधानसभाक्षेत्रस्य पुनर्निर्वाचने महती विजयम् अवाप्नोत्



हिमसंस्कृतवार्ता। पश्चिमबङ्गालराज्ये, भारतीय जनता पार्टीति दलस्य प्रत्याशी देबाङ्शु-पाण्डा इत्येषः, फाल्टा-विधानसभाक्षेत्रस्य पुनर्निर्वाचने महती विजयम् अवाप्नोत्। श्रीपाण्डा नव-सहस्रोत्तरैकलक्ष-मतैः विजितवान्। भारतीयसाम्यवादिदलस्य मार्क्सवादी शंभु नाथ कुर्मी इत्येषः द्वितीयस्थाने आसीत्, तदनन्तरं काङ्ग्रेस्-दलस्य अब्दुर रज्जाक मोल्लाहः आसीत्। अखिलभारतीय-तृणमूल्-काङ्ग्रेस्-दलस्य प्रत्यशी जहागीर खानः चतुर्थस्थाने आसीत्। पश्चिमबङ्ग-विधानसभा निर्वाचनस्य मतदानस्य समये बृहदस्तरे दुराचारस्य आरोपस्य अनन्तरं निर्वाचनायोगः फाल्टा-नगरे पुनः मतदानस्य आदेशः प्रदत्तवान् आसीत्। अस्मिन् मासे एकविंशति दिनाङ्के पुनः मतदानम् अभवत्। सद्यः एव विधानसभानिर्वाचने भाजपेति दलेन सप्तोत्तरद्विशत आसनानि जित्वा राज्ये प्रथमं बारं सर्वकारस्य निर्माणं कृतं यस्मिन् सुभेन्दु अधिकारी मुख्यमन्त्री अभवत्।

## इबोला सङ्क्रमणस्य विकटस्थितिं दृष्ट्वा प्रशासनेन सर्वेभ्यः भारतीयनागरिकेभ्यः अनावश्यकयात्रायाः परिहारः कर्तुं परामर्शः दत्तः

हिमसंस्कृतवार्ता। प्रशासनेन सर्वेभ्यः भारतीयनागरिकेभ्यः अनावश्यकयात्रायाः परिहारः कर्तुं परामर्शः दत्तः। इबोला सङ्क्रमणस्य विकटस्थितिं दृष्ट्वा डेमोक्रेटिक रिपब्लिक ऑफ कांगो, युगाण्डा तथा दक्षिण सूडान-देशेषु च अग्रिमादेशपर्यन्तं प्रवासस्य अनुमतिः न प्रदत्ता। मन्त्रालयेन एतेषु देशेषु निवसभ्यः अथवा यात्रां कुर्वद्भ्यः भारतीयनागरिकेभ्यः स्थानीयप्राधिकरणैः निर्गतानां सार्वजनिकस्वास्थ्यसम्बद्धानां निर्देशानां कठोरतया पालनं कर्तुं निर्देशः दत्तः। स्वास्थ्य-परिवारकल्याणमन्त्रालयेन सूचितं यत् भारतदेशे इबोला सङ्क्रमणस्य किमपि प्रकरणं न प्राप्तम्।

## पाकिस्तानस्य बलूचिस्तान-प्रान्ते रेलमार्गे विस्फोटेन चतुर्विंशति जनाः मृताः नैके च व्रणिताः

हिमसंस्कृतवार्ता। पाकिस्तानस्य बलूचिस्तान-प्रान्ते रेलमार्गे विस्फोटेन चतुर्विंशति जनाः मृताः नैके च व्रणिताः। राजधान्याः क्वेटा-नगरस्य चमन-फाटक-रेलस्थानकस्य समीपे विस्फोटः अभवत्। विस्फोटे एकस्य रेलयानस्य आंशिकः क्षतिः अभवत्, अस्मिन् क्षेत्रे प्रायः दशवाहनेषु क्षतिः अभवत्। घटनायाः अनन्तरं, सम्पूर्ण क्वेटा-प्रदेशे सर्वकारीय-चिकित्सालयेषु आपत्कालस्य घोषणा कृताऽस्ति, यत्र चिकित्सकाः, चिकित्सा-कर्मचारिणः च परिस्थिति नियन्त्रयितुं आहूताः। रेलवे अधिकारिणः उक्तवन्तः यत् विस्फोटानन्तरं पेशावर-नगरं प्रति गम्यमानम् जाफर-एक्स्प्रेस-रेलयानम् क्वेटा-रेल-स्थानके एव अवरोधितम्। गृहमन्त्रिणः प्रवक्ता बाबर यूसुफ़ज़ई इत्येषः अवदत् यत् नगरे विस्फोटानन्तरं सर्वाः सम्बद्धसंस्थाः अतीव सतर्कतायां स्थापिताः सन्ति।

## सुभाषितम्

**मातृवत्परदारेषु, परद्रव्येषु लोष्ठवत्।
आत्मवत्सर्वभूतेषु, यः पश्यति स पश्यति।।**

अर्थात्- जो व्यक्ति अन्य स्त्रियों को अपनी माता के समान सम्मान देता हो तथा अन्यों की धन-संपत्ति को मिट्टी के एक ढेले के समान देखता हो, समस्त प्राणिमात्र को स्वयं अपने ही समान देखता हो, उसी का दृष्टिकोण वास्तव में सही दृष्टिकोण है।




## केन्द्रीय-माध्यमिक शिक्षा परिषदा सी. बी. एस्. ई. अनुचित-शुल्क-ग्रहणविषये प्रदत्तं स्पष्टीकरणम्

केन्द्रीय-माध्यमिक शिक्षा परिषदा सी. बी. एस्. ई. इत्यनेन अस्य मासस्य एकविंशति द्वाविंशति दिनाङ्कयोः तान्त्रिकी-समाह्वानानां कारणात् केषुचित् प्रकरणेषु अनुचित-शुल्क-ग्रहणं अभवत्। एकस्मिन् वक्तव्ये, सी. बी. एस्. ई. इत्यनेन उक्तं यत् मूल्यांकितानां उत्तरपुस्तिकानां स्कैन कृतानां प्रतिलिपिनां आवेदनावधौ एषा समस्या अभवत्। सः अग्रे अवदत् यत् केषुचित् सन्दर्भेषु अतिरिक्तं शुल्कं गृहीतं, केषुचित् सन्दर्भेषु न्यूनम् एव गृहीतम्।

# HP PANCHAYAT ELECTION- पुनर्गणनार्थं (रिकाउंटिंग) १० निमेषाणाम् अभ्यन्तरे लिखितरूपेण करणीयं भविष्यति आवेदनम्, मार्गदर्शिका निर्गता




हिमसंस्कृतवार्ताः- शिमला। नूतन-मार्गदर्शिकायाः (गाइडलाइन) अनुसारेण मतगणनायाः समाप्त्यन्तरं निर्वाचन-अधिकारिणा ('रिटर्निंग' अधिकारिणा) अथवा सहायक- 'रिटर्निंग' अधिकारिणा प्रत्याशिभिः प्राप्तानां मतानां घोषणा करिष्यते। अस्य सद्यः पश्चात् प्रत्याशिनः अथवा तेषां मतगणना-अभिकर्तारः (एजेंट) पुनर्गणनायाः याचनाय केवलं १० निमेषाणां (१० मिनट) समयं प्राप्स्यन्ति। आयोगेन स्पष्टीकृतं यत् पुनर्गणनार्थं आवेदनं लिखितरूपेण दानम् अनिवार्यं भविष्यति। मौखिकी याचना न स्वीकरिष्यते। निर्देशानुसारं निर्वाचन-अधिकारी आवेदनं पूर्णरूपेण स्वीकृतम्, आंशिकरूपेण स्वीकृतं वा अस्वीकृतं कर्तुं शक्नोति। आवेदनस्य अस्वीकार-स्थितौ कारणं लिखितरूपेण दातव्यं भविष्यति। अन्तिम-परिणामस्य घोषणायाः अनन्तरं कस्यापि प्रकारकस्य पुनर्गणनायाः याचना न स्वीकरिष्यते। सामान्य-परिस्थितिषु कस्मैचित् प्रत्याशिने पुनर्गणनायाः केवलं एकः एव अवसरः प्राप्स्यते। यदि द्वन्द्वं समत्वे समाप्यते, तदापि पुनर्गणना एकवारमेव विधास्यते। तथापि विशेष- परिस्थितिषु निर्वाचन-अधिकारी स्व- विवेकाधिकारस्य उपयोगं कर्तुं शक्नोति। आयोगेन सचेतना प्रदत्ता यत् कस्यापि स्तरस्य उपेक्षायां सत्यां सम्बद्धानाम् अधिकारिणां विरुद्धं अनुशासनात्मकं विधिकार्यविधिः च व्यवहारे आनेष्यते। पञ्चायतनिर्वाचनेषु एकस्यामेव मतपेटिकायां त्रयाणां विविधानां वर्णाणां मतपत्राणि पात्यन्ते।
मतपेटिकायाः उद्घाटनान्तरं सर्वप्रथमं मतपत्राणि अविपाट्य वर्ण-आधारेण पृथक् करिष्यन्ते। मतपत्र-लेखाविवरणेन सह तेषां मेलनं भविष्यति। ततः परं मतपत्राणि सम्मिश्र्य प्रत्याशिनां पक्षे पतितानां मतपत्राणां २५-२५ परिमिताः पुञ्जाः (बंडल) निर्मास्यन्ते। पञ्चायत-समितये जिला- परिषद्- निर्वाचनाय च पृथक् व्यवस्था वर्तते। आयोगेन निर्देशाः प्रदत्ताः यत् विविध-वर्णानां मतपत्राणां पृथक्करण-काले विशिष्टा सावधनता स्थापनीया, येन कस्यापि क्षेत्रस्य (वार्ड) मतपत्राणि सम्मिश्रितानि न भवेयुः।

## सीसिटीवी (CCTV), वीडियोग्राफी, वेब- कास्टिंग च अनिवार्यम्

मतगणना-प्रक्रियायाः निरीक्षणार्थं आयोगेन सर्वेषु मतगणना-केन्द्रेषु सीसीटीवी-यन्त्राणाम् अथवा वीडियोग्राफी-व्यवस्था अनिवार्या कृता। कॅमराः एतादृशेन प्रकारेण स्थापयिष्यन्ते येन मतगणना-तालिका (टेबल) अभिकर्तारश्च स्पष्टरूपेण दृग्गोचराः भवेयुः। अस्याः अभिलेखनं न्यूनातिन्यूनं त्रयः मासाः यावत् सुरक्षितं स्थापयिष्यते। संवेदनशीलेषु अतिसंवेदनशीलेषु च मतगणना- केन्द्रेषु 'वेब-कास्टिंग'-व्यवस्थापि विधास्यते। अपरतः, 'पोस्टल बैलेट' (पत्रमतपत्राणि) निश्चित- समयावधौ प्राप्यन्तरं सम्बद्धपदस्य सामान्य- मतपत्रैः सह सम्मिश्र्य एव गणिष्यते, येन मतदानस्य गोपनीयता सुरक्षिता तिष्ठेत्।

## अभिकर्ता एव उपस्थितः स्थास्यति

सम्मर्द-नियन्त्रणाय आयोगेन निर्दिष्टं यत् यस्य क्षेत्रस्य (बाड) मतगणना प्रचलन्ती भविष्यति, केवलं तस्यैव बार्डस्य अभिकर्ता मतगणना-कक्षे उपवेष्टुम् अनुमतिं प्राप्स्यति। तथापि प्रधान- उपप्रधान- पदयोः प्रत्याशिनः अथवा तेषाम् अभिकर्तारः समग्रप्रक्रियायाः काले उपस्थिताः स्थातुं शक्ष्यन्ति। पूर्वं वार्डसदस्यानां गणनाः यावत् सर्वेषां वार्ड-सदस्यानां मतगणना पूर्णा न भविष्यति, तावत् उपप्रधान-प्रधान-पदयोः मतानां गणना न आरप्स्यते।

## प्रधानस्य अन्ते भविष्यति मतगणना

राज्य-निर्वाचन-आयोगेन मतगणनायाः क्रमः अपि निर्धारितः। पञ्चायतनिर्वाचने सर्वप्रथमं वार्ड- सदस्य-पदानां मतगणना भविष्यति। तदनन्तरं उपप्रधानस्य, अन्ते च प्रधान-पदस्य मतानां गणना विधास्यते। यदि कस्मिंश्चित् क्षेत्रे सदस्यः निर्विरोधं निर्वाचितः जातः, तर्हि अग्रिमक्षेत्रस्य मतगणना प्रारप्स्यते।

# पेट्रोल-डीजल-इन्धनयोः वर्धमान-मूल्यानां विरोधाय सोमवासरे समग्र-प्रदेशे प्रदर्शनं विधास्यति काङ्ग्रेस-दलम्

हिमसंस्कृतवार्ताः - शिमला। प्रदेश-काङ्ग्रेस-अध्यक्षस्य विनयकुमारस्य नेतृत्वे प्रदेश-काङ्ग्रेसेन पेट्रोल-डीजल-इन्धनयोः निरन्तरं वर्धमान-मूल्यानां विरोधे २५ मई दिनाङ्के सर्वेषु जनपद-मुख्यालयेषु (District Headquarters) विरोध-प्रदर्शनस्य घोषणा कृता। काङ्ग्रेस-दलेन एतत् केन्द्रस्य भाजपा-सर्वकारस्य जनविरोधी-नीतीनां विरुद्धं बृहत् आन्दोलनम् इति कथितम्। प्रदेश-काङ्ग्रेस-अध्यक्षेण विनयकुमारेण सर्वे जनपद-काङ्ग्रेस-अध्यक्षाः आदिष्टाः यत् ते अस्मिन् प्रदर्शने दलस्य नेतृणाम्, पदाधिकारिणाम्, अग्रणी-सङ्घटनानां तथा विविधानां विभागानां कार्यकर्तृणां अधिकतमं सहभागित्वं सुनिश्चितं कुर्युः। तेन उक्तं यत् निरन्तरं वर्धमान-मूल्यवृद्धेः विरुद्धं काङ्ग्रेस-पक्षः एकीभूय जनसामान्यानां स्वरं प्रखरं करिष्यति। विनयकुमारेण पेट्रोल-डीजल-इन्धनयोः मूल्येषु जायमानां निरन्तरां वृद्धिं प्रति चिन्ता प्रकटयता कथितं यत्— "एतादृशं प्रतीयते यत् केन्द्रस्य मोदी-सर्वकारेण तैल-कम्पनीभ्यः सामान्य-जनानां लुण्ठनाय मुक्ता अनुमतिः प्रत्ता अस्ति।" तेन आरोपः कृतः यत् इन्धन-मूल्येषु वृद्ध्या देशः मूल्यवृद्धेः पङ्के (दलदल में) निमज्जन् अस्ति तथा आवश्यकानां वस्तूनां मूल्यानि अपि निरन्तरं वर्धन्ते। तेन प्रतिपादितं यत् भाजपा वर्धमान-महार्घतायाः तैल-मूल्यानां च उपरि पूर्णतः मौनं भजति। काङ्ग्रेस-अध्यक्षेन भाजपा-पक्षस्य उपरि केवलं राजनैतिक-लाभाय जनानां भावनाभिः सह क्रीडनस्य आरोपः स्थापितः। तेन उक्तं यत् काङ्ग्रेस-दलं सर्वदा जनसामान्यैः सह तिष्ठति तथा अन्यायस्य विरुद्धं प्रत्येकस्मिन् सङ्घर्षे अग्रे भविष्यति।

## नगरनिकाय-निर्वाचनेषु भाजपा-दलं प्रति तीक्ष्णाक्षेपः

विनयकुमारेण प्रदेश-भाजपा-नेतृणाम् उपरि अपि प्रहारं कुर्वता कथितं यत् सम्प्रति सम्पन्नस्य नगरनिकाय-निर्वाचनस्य परिणामैः भाजपेति हतोत्साहितं सञ्जातम् अस्ति। तेन विश्वासः कृतः यत् प्रदेशे भाजपा तीव्रगत्या विघटनं प्रति गच्छत् अस्ति। तेन उक्तं यत् आगामि-पञ्चायतीराज-संस्थानां निर्वाचनेषुपि काङ्ग्रेस-पक्षः विजय-वैजयन्तीं तोषयिष्यति। विनयकुमारस्यानुसारं भाजपा सुदीर्घकालात् असत्यं भाषित्वा जनान् भ्रमितुं प्रयासं करोति स्म, परन्तु अधुना जनता तस्याः भ्रमे आगमिष्यन्तीति नास्ति।

# मुख्यमन्त्रिणः 'चिट्टामुक्त-हिमाचलम्'-अभियानेन सह सम्बद्धाः २.३४ लक्षं जनाः, प्रदेशस्य २३४ पञ्चायताः रक्त-क्षेत्रे ('रेड-जोने') समाविष्टाः



हिमसंस्कृतवार्ताः - शिमला। मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खुमहोदयस्य 'चिट्टामुक्त-हिमाचलम्'-अभियानाय समग्र-प्रदेशे व्यापकं जनसमर्थनं प्राप्यते। राज्ये अधुना यावत् २.३४ लक्षं जनाः अनेन अभियानेन सह सम्बद्धाः अभवन्। पञ्चायतीराज-विभागेन एतेभ्यः जनेभ्यः मादकद्रव्याणां दुरुपयोगस्य निरोधः, आपदा-प्रबन्धनं तथा सामाजिक-जागरूकता सदृशेशु विषयेषु विशिष्टं प्रशिक्षणं प्रदत्तम्, येन ते स्व-स्व-क्षेत्रेषु एतासां आह्वानानां प्रभाविरूपेण प्रतिरोधं कर्तुं शक्नुयुः। राज्यस्य एते २.३४ लक्षं जनाः राज्यसर्वकारस्य अक्षीणि श्रोत्राणि च (आँख और कान) भूत्वा नशा-व्यापारिणां सूचनां समये आरक्षकदलम् (Police) प्रति प्रेषयन्ति, येन अपराधिनः विरुद्धं कठोरा कार्यविधिः निश्चिता भवेत्। हिमाचलः देशस्य प्रथमं राज्यं सञ्जातं, यत्र पञ्चायत-स्तरे 'चिट्टा'-प्रभावित-क्षेत्राणां वैज्ञानिक-आधारेण वर्गीकरणं विहितम्। प्रदेशस्य पञ्चायताः रक्त (रेड), पीत (येलो) तथा हरित (ग्रीन) श्रेणीषु विभक्ताः सन्ति।
अत्र २३४ पञ्चायताः रक्त श्रेण्यां स्थापिताः, यत्र 'चिट्टा' इति मादकद्रव्यस्य प्रभावः सर्वाधिकः प्राप्तः। अस्य अभियानस्य उद्देश्यं केवलं मादकद्रव्याणां तस्करी-अवरोधनमेव नास्ति, अपितु यूनां कृते सकारात्मिकां दिशं प्रदाय सुरक्षिताय स्वस्थाय च समाज-निर्माणायापि वर्तते। मुख्यमन्त्रिणा प्रतिपादितं यत् राज्यसर्वकारः 'चिट्टामुक्त-हिमाचलम्'-सङ्कल्पं जन-आन्दोलनस्य रूपं प्रदातुं प्रतिबद्धः अस्ति तथा समाजस्य प्रत्येकस्य वर्गस्य सहभागितया अस्य आह्वानस्य प्रभावशालि-समाधानं सुनिश्चितं करिष्यते। राज्यसर्वकारः यत्र अपराधिषु विधिकठोरतां तनोति, तत्रैव नशा-प्रभावितानां जनानां पुनर्वासार्थम् (Rehabilitation) अपि प्रभाविनः प्रयासाः क्रियन्ते।

# ब्लूप्रिन्ट- प्रश्नपत्र- निर्माण- शिक्षाशास्त्रविषये पञ्चदिवसीय- प्रशिक्षणस्य समापनम्



**हिमसंस्कृतवार्ताः-** मुंगेली/छत्तीसगढ़-शासनस्य माध्यमिक- शिक्षा- मण्डल- रायपुरस्य निर्देशानुसारं तथा जिला- शिक्षा- प्रशिक्षण- संस्थान- पेण्ड्रस्य मार्गदर्शनेन मुंगेली- स्थिते बी. आर. सी. सी. प्रशिक्षणकेन्द्रे पञ्चदिवसीयः "ब्लूप्रिन्ट- प्रश्नपत्रनिर्माणं शिक्षाशास्त्रं च" इति विषयकः प्रशिक्षण-कार्यक्रमः आयोजितः। अस्य प्रशिक्षणस्य उद्देश्यं शिक्षकेभ्यः आधुनिक-शिक्षणपद्धतीनां, प्रश्नपत्र-निर्माणस्य वैज्ञानिकविधीनां तथा विद्यार्थिनामधिगम- क्षमता-विकासोपायानां ज्ञानं प्रदातुम् आसीत्।समापनसमारोहे मुख्यातिथिरूपेण उपस्थितः जिला-शिक्षा- अधिकारी एल. पी. डाहिरेमहोदयः व्याख्यातृन् प्रशिक्षणार्थिनश्च सम्बोधयन् उक्तवान् यत् कलेक्टर- कुन्दनकुमार- महोदयस्य मार्गदर्शनेन अस्मिन् वर्षे जनपदस्य बोर्ड- परीक्षा-परिणामः सन्तोषजनकोऽभवत्। आगामिसत्रे नवम्याः द्वादश्याः पर्यन्तं विद्यार्थिनां कृते उत्तम-लक्ष्याणि निर्धारितानि भविष्यन्ति, येन शिक्षायाः गुणवत्तायामधिकः सुधारः सम्भविष्यति।डी. एम. सी. अशोकसोनीमहोदयः अवदत् यदागामिसमयः कृत्रिम-बुद्धिमत्तायाः भविष्यति तथा शिक्षकैः डिजिटलाधारित-शिक्षण-पद्धत्यै सज्जैर्भवितव्यम्। तेनोक्तं यद् ब्लूप्रिन्ट- निर्माणाधारितमेतत् प्रशिक्षणमागामिसत्रे विद्यार्थिनां कृते अत्यन्तोपयोगी सिद्धं भविष्यति।विकासखण्ड- शिक्षा-अधिकारी जितेन्द्रबावरे- महोदयः पठन-पाठन-आदतेर्महत्त्वं प्रतिपादयन् उक्तवान् यच्छिक्षकैर्विद्यार्थिभिश्च नियमितमध्ययनं करणीयम्। बालकेषु लेखन- क्षमता- विकासार्थं पुस्तक-पठनं लेखनाभ्यासश्चावश्यकौ स्तः। तेनोक्तं यद् ब्लूप्रिन्ट-प्रश्नपत्र-निर्माण-शिक्षाशास्त्राधारितमेतत् प्रशिक्षणं भविष्ये शिक्षणकार्यम् अधिक-प्रभावी करिष्यति।बी. आर. सी. सी. सूर्यकान्तोपाध्यायमहोदयः अवदत् यत् १९ मईतः २३ मई-पर्यन्तम् आयोजितेऽस्मिन् प्रशिक्षण-कार्यक्रमे दशमी- द्वादशी- कक्षयोः कृते ब्लूप्रिन्ट-निर्माणं, शिक्षणपद्धतिः तथा ब्लूम-टैक्सोनॉमी- १९५६- आधारित- शिक्षण- प्रविधीनां विषये विस्तृता परिचर्चा कृता। प्रशिक्षणे एतदपि शिक्षितं यत् कथं ज्ञानम्, अवबोधनम्, अनुप्रयोगः, विश्लेषणम्, मूल्याङ्कनं तथा सृजनात्मक-क्षमताः आधारितानि प्रश्नपत्राणि निर्मीयेरन्।प्रतिवेदन-वाचनकाले एस. दत्ता, वन्दना- खाण्डेकर, बुद्धेश्वरोपाध्याय, नीलयगुप्त तथा रूहीफातिमा- महोदयाः ब्लूम-टैक्सोनॉमी- आधारित- प्रश्ननिर्माणप्रक्रियायाः विषये विस्तृतां जानकारीं दत्तवन्तः। तैरुक्तं यदस्य उद्देश्यं विद्यार्थिषु विषयबोधस्य विकासं कर्तुं तथा तानध्ययन- अध्यापन- प्रक्रियया सह सम्बद्धान् कर्तुमस्ति, येन परीक्षा-परिणामः श्रेष्ठो भवेत्।अस्मिन्नवसरे संस्कृत-व्याख्याता डॉ. रामबाबूमिश्र-महोदयेन "संस्कृतं कथं शिक्षेत" इति विषयकः विशेष-प्रदर्शन-कार्यक्रमः आयोजितः। प्रदर्शिन्यां संस्कृतभाषाया महत्त्वं सरल-शिक्षण-विधयश्च प्रदर्शिताः, यस्य जिला-शिक्षा-अधिकारिणः उपस्थित- अधिकारिणां च प्रशंसा प्राप्ता।एतस्य प्रशिक्षण-कार्यक्रमस्य कार्यशाला प्रेरणास्त्रोतरूपेण वैदिकगणस्य संस्थापकाध्यक्षः वत्सदेशराजशर्मामहोदयः विशेषरूपेण स्मृतः। तस्य प्रेरणया शिक्षकेषु नवाचार-आधारित- शिक्षणपद्धतेः, संस्कृत- समन्वित- अध्यापनस्य तथा गुणवत्तापूर्ण-शिक्षणस्य भावनाया जागरणं जातम्। कार्यक्रमे मास्टर-ट्रेनर्सरूपेण मोहनोपाध्याय, संगीतासिंह, डॉ. रामबाबूमिश्र, रविन्द्रगुप्त, लक्ष्मीनारायणभास्कर, शिवशङ्करनेताम तथा विक्रमसिंहठाकुरमहोदयाः तथा कला- वाणिज्य- भाषा- समूहस्य प्रशिक्षणार्थिन उपस्थिताः आसन्। कार्यक्रमस्य सञ्चालनं मोहनोपाध्याय-महोदयेन कृतम्, आभार-प्रदर्शनं च बी. आर. सी. सूर्यकान्तोपाध्याय-महोदयेन कृतम्।

# प्रो. शिवशङ्करमिश्रः "श्रीरङ्गलक्ष्मी आदर्शसंस्कृतमहाविद्यालयस्य, वृन्दावनस्य" प्रबन्धसमितेः अध्यक्षपदे नियुक्तः



**हिमसंस्कृतवार्ताः- डॉ.विजयकुमारः।** महर्षिपाणिनि- संस्कृत-वैदिक- विश्वविद्यालयस्य माननीयकुलगुरुः प्रो. शिवशङ्करमिश्रः "श्रीरङ्गलक्ष्मी आदर्शसंस्कृतमहाविद्यालयस्य, वृन्दावनस्य" प्रबन्धसमितेः अध्यक्षपदे नियुक्तः। प्रो. शिवशंकरमिश्रमहोदयः केन्द्रीय- संस्कृत-विश्वविद्यालयः, नवदेहली इत्यनेन सम्बद्धस्य श्रीरङ्गलक्ष्मी- आदर्श संस्कृतमहाविद्यालयस्य प्रबन्धसमितेः अध्यक्षपदे नियुक्तः।
अस्मात्पूर्वं प्रो. मिश्रः एकरसानन्द- आदर्शसंस्कृतमहाविद्यालयस्य प्रबन्धसमितेः अध्यक्षरूपेण अपि कार्यं कृतवान्। भवतः मार्गदर्शनेन आदर्श- संस्कृत- महाविद्यालयानां श्रेण्यावसरे महाविद्यालयस्य ए-ग्रेड इति श्रेणी प्राप्ता। भवतः कार्यकाले महाविद्यालयस्य केन्द्रीय- संस्कृत-विश्वविद्यालयेन सह सम्बद्धता, अध्यापकानां पदोन्नतिः, नवीनपाठ्यक्रमाणां शुभारम्भः, "एकरसा" इति पत्रिकायाः प्रकाशनम्, संस्थायाः सर्वाङ्गीणविकासाय च विविधकार्याणि सम्पन्नानि।
अस्मिन् अवसरे कुलगुरुः प्रो. मिश्रः केन्द्रीय- संस्कृत- विश्वविद्यालयस्य कुलपतेः प्रो. श्रीनिवास वरखेड़ीमहोदयस्य प्रति कृतज्ञतां प्रकटितवान् तथा प्रदत्तदायित्वस्य निष्ठया सम्यक् निर्वहनपूर्वकं महाविद्यालयस्य सर्वाङ्गीणविकासाय निरन्तरं प्रयत्नशीलः भविष्यतीति आश्वासनम् प्रदत्तम्। अस्मिन् अवसरे विश्वविद्यालयस्य समस्तप्राध्यापकाः कर्मचारिणः च माननीयकुलगुरुमहोदयाय शुभकामनाः प्रेषितवन्तः।

# बिहारे अपराधिवृद्ध्या शासनस्य दुर्बलता प्रकाशिता- राजनैतिकस्वार्थसिद्धये प्रशासनतन्त्रस्य दुरुपयोगः क्रियतेः एजाज अहमदः

**हिमसंस्कृतवार्ताः- राघव नाथ झा।** बिहारप्रदेशीय- राष्ट्रीयजनतादलस्य प्रदेशप्रवक्ता एजाज- अहमदमहोदयेन राज्यस्य विधिव्यवस्थां प्रति गम्भीरं चिन्तां प्रकटयन् आरोपितं यत् अपराधनिवारणे अपराधिनिग्रहे च राज्यसरकारः पूर्णतया निष्फला जाता अस्ति। तेन उक्तं यत् शासनप्रशासनयोः उपयोगः जनकल्याणाय न, अपितु राजनैतिकस्वार्थसाधनाय क्रियते।तेनोक्तं यत् राज्ये अपराधिनां मनोबलम् अत्यधिकं वर्धितम् अस्ति, यतः शासनस्य भयम् अधुना दृश्यते न। अपराधिनां विरुद्धं कठोरकार्यवाहीकर्तुं प्रशासनस्य अक्षमता प्रतिदिनं स्पष्टतया प्रकटते। तेन तीव्रशब्देषु उक्तं यत् "सरकारस्य प्रभावः अधिकारश्च सम्पूर्णतया क्षीणः जातः।" अग्रे तेन कथितं यत् ये व्यक्तयः पूर्वं पुलिसप्रशासनेन अन्वेषणस्य विषयाः आसन्, अद्य तेषामेव निर्देशानुसारम् अन्येषां गृहेषु अन्वेषणकार्यवाही क्रियते। एतादृशी स्थितिः शासनतन्त्रस्य पतनस्य प्रत्यक्षं लक्षणम् अस्ति। तेन व्यङ्ग्यात्मकतया उक्तं यत् अन्वेषणकार्यवाह्याः पूर्वमेव पुलिसकर्मिभिः स्वकीयतलाशी दातव्या भवति, एतत् सरकारस्य दुर्बलतायाः स्पष्टं प्रमाणम् अस्ति।
एजाज अहमदमहोदयेन आरोपितं यत् राज्ये विधि- व्यवस्थाया नाम्ना या कार्यपद्धतिः प्रवर्तते, सा न्यायतन्त्रस्य मूलभावनां दुर्बलयति। अपराधिनां ग्रहणं पुलिसप्रशासनयोः दायित्वम् अस्ति, दण्डनिर्णयः तु न्यायपालिकायाः अधिकारक्षेत्रे अन्तर्भवति। किन्तु शासनस्थैः कतिपयैः व्यक्तिभिः आत्मप्रशंसालाभाय संविधानविरुद्धाः उपायाः स्वीकृताः, ये लोकतान्त्रिकव्यवस्थायाः कृते घातकाः सन्ति। तेनोक्तं यत् यदि शासनस्य शीर्षस्थाः अपि एतादृशानां कार्याणां समर्थनं कुर्वन्ति, तर्हि न्यायपालिकायाः गरिमा संविधानस्य मर्यादा च कथं सुरक्षिते भविष्यतः? संविधानस्य अन्तर्गतं प्रत्येकसंस्थायाः कार्यसीमा सुनिश्चितास्ति, तस्य उल्लङ्घनं व्यवस्थाविनाशस्य कारणं भवति। अन्ते तेन उक्तं यत् बिहारसरकारः विधि- व्यवस्थारक्षणे सर्वथा असफलाभूता अस्ति। तेन प्रशासनिकनिष्पक्षतायाः संरक्षणस्य सर्वेषां नागरिकानां प्रति समानव्यवहारस्य च दृढमागः कृतः।

# श्रीरामपादाङ्कपाविते बक्सरस्य रामरेखातीरे दिव्य- भव्य- श्रीरामप्रतिमास्थापनायाः ऐतिहासिकी घोषणा- मुख्यमन्त्रिणा धार्मिक- सांस्कृतिक- विकासपरियोजनानां लोकार्पणं सम्पन्नम्







**हिमसंस्कृतवार्ता, राघव नाथ झा।** सम्राट चौधरी महोदयेन धर्मसंस्कृतिसम्पन्नायां पुण्यभूमौ बक्सरनगर्यां विराजमानस्य श्रीवामनभगवता प्रतिष्ठापितस्य शिवलिङ्गस्वरूपिणः श्रीवामनेश्वरनाथमहादेवस्य अतीवप्राचीनदेवालये श्रद्धाभक्तिपूर्वकं विधिवत् पूजाऽर्चनं सम्पन्नं कृत्वा बिहारराज्यस्य सुखशान्तिसमृद्धिसमन्वितस्य सर्वाङ्गीणविकासस्य च मङ्गलकामना कृता। पूजाऽर्चनानन्तरं तेन देवालयपरिसरस्य सूक्ष्मतया निरीक्षणं कृत्वा प्रचलित-विकासकार्याणां प्रगतेः सम्यगवलोकनं कृतम्। निरीक्षणावसरे सम्बन्धिताधिकारिभिः प्रस्तावित-वामनेश्वरधाम- विकासयोजनायाः विन्यासरूपरेखामाध्यमेन विस्तृतविवरणं प्रस्तुतम्। उल्लेखनीयं यत् एतत्प्राचीनदेवालयं बक्सर-केन्द्रीयकारागारस्य बाह्यप्राकारसीम्नि अवस्थितम् अस्ति।

तदनन्तरं मुख्यमन्त्रिणा केन्द्रीयकारागारस्थित-निर्माणशालायां बन्दिजनैः निर्मितानां हस्तकलावस्तूनां विविधोपयोगिसामग्रीणां च प्रदर्शनी निरीक्षिता। देवालयप्राङ्गणे तेन श्रद्धया वृक्षारोपणकार्यं सम्पन्नम्।

बक्सर- जिलाधिकारिण्या साहिला-महोदयया चरख-प्रतीकचिह्नसमर्पणपूर्वकं मुख्यमन्त्रिणः सादरमभिनन्दनं विहितम्। श्रीवामनावतारभूमित्वेन मर्यादापुरुषोत्तम-श्रीरामस्य शिक्षास्थलीत्वेन च विख्यातायां धर्मनगर्यां बक्सरभूमौ मुख्यमन्त्रिणः प्रथमागमनावसरे स्थानीयजनप्रतिनिधिभिः, जननेतृभिः, प्रशासनिकाधिकारिभिः च पुष्पगुच्छैः, अङ्गवस्त्रैः, माल्यैः च भव्यस्वागतसमारोहः समायोजितः। अनन्तरं मुख्यमन्त्री बक्सरस्य पावन- रामरेखाघाटस्थिते रामेश्वरनाथमंदिर- देवालये समुपस्थित्य श्रद्धाभक्तिसमन्वितां पूजाऽर्चनां सम्पन्नां कृत्वा राज्यस्य प्रगतिसमृद्ध्योः अखण्डलोकमङ्गलस्य च प्रार्थनामकरोत्। अयं स एव पुण्यप्रदेशः यत्र मर्यादापुरुषोत्तमेन श्रीरामेण स्वहस्तेन प्रथमशिवलिङ्गस्य प्रतिष्ठा कृतेति धार्मिकपरम्परा प्रचलिता वर्तते। श्रीरामेश्वरनाथ-सेवाश्रम- न्याससमित्याः पदाधिकरिभिः मुख्यमन्त्रिणे अङ्गवस्त्र- प्रतीकचिह्न- समर्पणपूर्वकं सविशेषसम्मानः प्रदत्तः।

मुख्यमन्त्रिणा रामरेखाघाटक्षेत्रे सम्पन्नानां जीर्णोद्धार-विकासकार्याणामपि स्थलीयनिरीक्षणं कृतम्। निरीक्षणक्रमे अधिकारिभिः स्थलगत-विकासपरियोजनायाः माध्यमेन सौन्दर्यीकरणकार्याणाम्, आधारभूत- सुविधाविस्तारस्य, जनोपयोगीयोजनानां च विषये सविस्तरं निवेदनं प्रस्तुतम्। प्रस्तावित- भगवत्-श्रीरामप्रतिमा, नियन्त्रणकक्षव्यवस्था, विशुद्धपेयजलसुविधा, पदचारीमार्गनिर्माणम्, वस्त्रपरिवर्तनकक्षः, गङ्गाऽरात्रिकमञ्चः इत्यादीनां विषयेऽपि मुख्यमन्त्री सम्यगवगतः कृतः।

एतस्मिन्नेव पुण्यावसरे मुख्यमन्त्रिणा जनसमक्षम् ऐतिहासिकी घोषणा कृता यत्- "श्रीरामपादाङ्कपाविते बक्सरस्य रामरेखातीरे प्रभोः श्रीरामस्य दिव्यभव्यप्रतिमायाः स्थापना शीघ्रमेव विधास्यते।"

तदनन्तरं मुख्यमन्त्रिणा प्रायः षट्कोटिरूप्यकव्ययेन पुनर्निर्मितस्य रामरेखाघाटस्थितस्य प्रकाश-ध्वनिप्रदर्शनसंकुलस्य तथा महर्षिविश्वामित्रमण्डपस्य दूरसञ्चारमाध्यमेन शिलापट्टोद्घाटनं कृत्वा लोकार्पणं सम्पन्नम्। उद्घाटनावसरे सम्बन्धिताधिकारिभिः संकुले उपलब्धानामाधुनिकसुविधानां विषये विस्तृतविवरणं निवेदितम्।

उद्घाटनोपरान्तं प्रकाश-ध्वन्यात्मकप्रदर्शनमाध्यमेन बक्सरस्य ऐतिहासिक- पौराणिक- सांस्कृतिकवैभवस्य मनोहारिण्यः झलकाः प्रदर्शिताः। अस्मिन् संकुले पञ्चायामीय- नाट्यगृहम्, प्रवेशपत्रवितरणकेन्द्रम्, अशीतिजन- क्षमतायुक्तम् आभ्यन्तरभोजनालयं, त्रिंशज्जनक्षमतायुक्तं बहिर्भोजनालयं, शुष्कप्रपातफव्वारः, विविधाः जनोपयोगिसुविधाः समुचितरूपेण विकसिताः सन्ति। अस्यैव समारोहस्य मध्ये मुख्यमन्त्रिणा दूरसञ्चारमाध्यमेन स्वर्गीय-महाराज- कमलबहादुरसिंहमहोदयस्य प्रतिमायाः अनावरणमपि सम्पन्नम्।अस्मिन्नवसरे बक्सर- जिलायाः प्रभारीमन्त्री नंदकिशोर राम, पर्यटनमन्त्री केदार प्रसाद गुप्ता, पूर्वकेन्द्रीयमन्त्री अश्विनीकुमारचौबे, विविधजनप्रतिनिधयः, प्रशासनिकाधिकारिणः, सुरक्षा-अधिकारिणः, अन्ये गण्यमान्यजनाः च सादरमुपस्थिताः आसन्।

# ग्रीष्मतापनिवारणार्थं महावीरमन्दिरेण नीट- परीक्षार्थिभ्यः सहस्रकिलोग्राम- परिमित- सत्तूपेयवितरणस्य व्यवस्था

**हिमसंस्कृतवार्ता, राघव नाथ झा।** महावीर मंदिरम् इति विख्यातं देवालयं समाजसेवायाः, लोककल्याणस्य च क्षेत्रे सर्वत्र सुप्रसिद्धम् अस्ति। अयोध्यायां सञ्चाल्यमाना "रामरसोई", सीतामढ्यां प्रवर्तमाना "सीतारसोई", महावीरमन्दिरपरिसरे च नियमिततया सञ्चाल्यमानं "दरिद्रनारायणभोजनम्" इत्यादीनि तस्य जनहितसमर्पितायाः परम्परायाः जीवन्तानि प्रमाणानि सन्ति। अधुना पुनः महावीरमन्दिरप्रशासनेन राष्ट्रिय- चिकित्सा-प्रवेशपरीक्षायाः परीक्षार्थिनां कृते शीतल- सत्तूपेय-वितरणस्य विशेषव्यवस्था विधीयते।राष्ट्रिय-चिकित्साप्रवेशपरीक्षायाः नूतना तिथिः २१ जून् २०२६ इति रविवासरे निर्धारिता अस्ति। पूर्वं ३ मई २०२६ तिथौ आयोजनीया एषा परीक्षा अपरिहार्यकारणवशात् निरस्ता आसीत्, अतः पुनरस्याः आयोजनं क्रियते। परीक्षा अपराह्णे द्विवादनसमये प्रारभिष्यते। तस्मात् तस्मिन् दिने पाटलिपुत्र-यानस्थानकक्षेत्रे देशस्य विविधभागेभ्यः बहुसंख्यकाः परीक्षार्थिनः समागमिष्यन्ति, ततः स्वस्वपरीक्षाकेन्द्राणि प्रति गमिष्यन्ति। ग्रीष्मकालीन- प्रचण्डतापस्य तीव्रतां विचार्य परीक्षार्थिनां श्रमपरिहारार्थं तापशमनार्थं च देवालयप्रशासनेन सहस्रकिलोग्राम-परिमितस्य सत्तूनः शीतलपेयस्य निर्माणं वितरणं च सुनिश्चितीकृतम्। एषा व्यवस्था देवालयपरिसरे नैवेद्यलड्डू- विभागस्य प्रभारी आर. शेषाद्रि-महोदयस्य पर्यवेक्षणे सम्पन्ना भविष्यति। एतस्य सेवाकार्यस्य पुष्टिः सायण कुणाल महाभागेन अपि कृता। तेनोक्तम्- "महावीरमन्दिरस्य प्रमुखा भावना सदैव जनसेवायामेव निहिता वर्तते। विविधप्रदेशेभ्यः आगच्छन्तः परीक्षार्थिनः ग्रीष्मतापेन क्लान्ताः भविष्यन्ति इति विचार्य तेषां कृते शीतल-सत्तूपेयस्य व्यवस्था क्रियते, येन ते शारीरिकक्लेशात् विमुक्ताः सन्तः प्रसन्नचित्तेन पूर्णैकाग्रतया च परीक्षायां सहभागीभवितुं समर्थाः भवेयुः।"



# कृत्रिमबुद्धिमत्त्याधारित- भविष्यदिशि प्रगच्छन् बिहारः

## "बिहार-कृत्रिमबुद्धिमत्ता-समागमः २०२६" उत्साहपूर्णेन वातावरणेन सम्पन्नः




**हिमसंस्कृतवार्ताः- राघव नाथ झा।**

पटना-नगरस्थिते ऊर्जा-प्रेक्षागृहे आयोजितस्य द्विदिवसीयस्य "बिहार-कृत्रिमबुद्धिमत्ता-समागमस्य २०२६" भव्यस्य कार्यक्रमस्य समापनं बिहारराज्यस्य तकनीक- नवोन्मेष- डिजिटलपरिवर्तनयोः नूतनसंकल्पेन सह उत्साहपूर्णे वातावरणे सम्पन्नम्। अयं समागमः राज्यस्य कृत्रिमबुद्धिमत्त्याधारितविकासस्य, नवप्रवर्तनस्य तथा भावि-डिजिटल- अर्थव्यवस्थायाः नूतनदिशां प्रदर्शयन् ऐतिहासिकमभवत्। समापनसमारोहे बिहारराज्यपालः माननीयः लेफ्टिनेंट- जनरल- सैयद- अताहसनैन-महोदयः (सेवानिवृत्तः) मुख्यातिथिरूपेण उपस्थितः आसीत्। तेन समागमे चर्चितविषयाणां वैविध्यस्य विशेषप्रशंसा कृता। स्वसम्बोधने तेन उक्तं यत् स्वास्थ्य- शिक्षा- कृषि- सामान्यजनजीवनसम्बद्धेषु कृत्रिमबुद्धिमत्तायाः विविधपक्षेषु यः गम्भीरः विमर्शः अभवत्, सः अत्यन्तं प्रासंगिकः प्रेरणादायकश्च अस्ति। तेन एतदपि प्रतिपादितं यत् बिहारराज्येन गतविंशतिवर्षेषु आधारभूतसंरचनाक्षेत्रे उल्लेखनीया प्रगतिः कृता, अधुना तु सूचना-प्राविधिक्यस्य कृत्रिमबुद्धिमत्तायाश्च क्षेत्रे अग्रे गन्तुं समयः समुपस्थितः अस्ति।लोकस्वास्थ्य- अभियन्त्रण- विभागस्य मन्त्री संजयकुमारसिंहमहोदयः अपि समागमे सम्बोधनं कृत्वा कृत्रिमबुद्धिमत्तायाः महत्त्वपूर्णभूमिकां प्रकाशयामास। अस्मिन्नवसरे सूचना- प्राविधिक्य- विभागस्य विशेषसचिवः अरविन्दचौधरीमहोदयः अपि उपस्थितः आसीत्। आयोजितेषु "न्यायबिहारः", "कृषककृत्रिमबुद्धिमत्ता", "उद्योगबिहारः" "सुरक्षितबिहारः" चेति विषयकेषु गहनसत्रेषु कृत्रिमबुद्धिमत्तायाः विविधायामेषु विस्तृतः सारगर्भितश्च विमर्शः सम्पन्नः। "न्यायबिहारः" सत्रे कृत्रिमबुद्धिमत्त्याधारित- विधिसहायता, भूम्यभिलेखानां अङ्कीकरणम् तथा सङ्गणकीय-अपराधेभ्यः संरक्षणम् इत्यादिषु विषयेषु विशेषज्ञैः स्वविचाराः प्रस्तुताः। "कृषक- कृत्रिमबुद्धिमत्ता" सत्रे मानवरहित- विमान- प्रौद्योगिक्या, मृदा-स्वास्थ्यपर्यवेक्षणेन, बुद्धिमत्- फसल- परामर्शेन बिहारस्य कृष्यर्थव्यवस्थां आधुनिकप्रौद्योगिक्या सह संयोजयितुं व्यवहारिक- समाधानानि प्रदर्शितानि। "उद्योगबिहारः" सत्रे बिहारस्य विंशतिलक्षाधिकानां लघु-मध्यमोद्यमानां कृते कृत्रिमबुद्धिमत्त्याधारित-उत्पादकतासमाधानानि, चर्मोद्योगे, वस्त्रोद्योगे, खाद्यप्रसंस्करणे, रेशमोद्योगे कृत्रिमबुद्धिमत्तायाः उपयोगविषये च विस्तृतचर्चा अभवत्। "सुरक्षितबिहारः" सत्रे वित्तीयसमावेशः, ई- शासनव्यवस्था, सङ्गणकीयसुरक्षा तथा कृत्रिम- चित्र- परिचय- प्रणाली इत्यादिषु समसामयिकविषयेषु गम्भीरमन्थनम् अभवत्। सहस्रशः प्रतिभागिनः, उद्यमिनः तथा तकनीकीविशेषज्ञाः अत्युत्साहेन अस्मिन् समागमे सहभागी अभवन्। तेषां सक्रियसहभागितया समापनसमारोहः उद्घाटनसमारोहवत् एव भव्यः ऐतिहासिकश्च अभवत्। "बिहार- कृत्रिमबुद्धिमत्ता- समागमः २०२६" इयं द्विदिवसीया आयोजनश्रृङ्खला दशसहस्राधिक-प्रतिभागिनां, शताधिक-वक्तॄणां, षष्ट्यधिक- प्रदर्शन-कक्षाणां तथा शतपञ्चाशदधिक- राष्ट्रीय- अन्तर्राष्ट्रीय-संस्थानां सहभागितया बिहारस्य इतिहासे मीलस्तम्भरूपेण प्रतिष्ठिता अभवत्। दशसु सत्रेषु स्वास्थ्य- शिक्षा- कृषि- न्याय- उद्योग- ग्रामीणविकास-सङ्गणकीयसुरक्षा- नगरीयविकासक्षेत्राणि कृत्रिमबुद्धिमत्तया सह संयोजयितुं विस्तृतः मार्गचित्रः निर्मितः। प्रत्यक्ष-माध्यम-प्रसारणेन अयं समागमः कोटिशः जनान् प्रति प्राप्तः, बिहारं देशस्य कृत्रिमबुद्धिमत्ता- मानचित्रे सशक्तस्थानं प्रदत्तवान्। अयं समागमः बिहारस्य सामर्थ्यस्य घोषणापत्ररूपेण इतिहासे अंकितः अभवत्- एषः तु केवलः प्रारम्भः।

# संस्कृतं मधुरं सदा -४१

अखिलजगतः सृष्टिः विचित्रपूर्णा, ज्ञातुमशक्या, सृष्टिरियं किमर्थं, का आवश्यकता अस्याः इत्यादिविषये न कोऽपि अद्यप्रभृति सम्यक् ज्ञातवान् । सृष्टौ केवलं रहस्यपूर्णमेव दृश्यं सर्वत्र । तथापि काले काले ऋषिमहर्षिः, दूरदर्शी, तत्त्वविद् इत्यादयः अनेके परमज्ञानिनः, महात्मानः च अस्मिन् धरातले प्रादुर्भूताः। तैः प्रतिपादितं यत् एतद्विशालस्य जगतः स्रष्टृरूपेण किञ्चन महाकारणम्, अथवा महाशक्तिः अवश्यं स्यादिति । तस्य तीव्रान्वेषणं तैः कृतम् । तं प्राप्तुं नानोपायाः, विधिविधानादयः तैः परिकल्पिताः । तेषूपायेषु स्तुतिः, प्रार्थना वा हि तत्सान्निध्यं प्राप्तौ काचिद् उत्तमोतमा साधना इति तैः निर्णीतम् । स्तुतौ को वा न तुष्यति । तस्मात् आर्तभावेन कृता भगवत्प्रार्थना तस्य साक्षात्कारस्य कारणं भवतीति तै निश्चितम् । अतः स्तुतिः कथं कर्तव्या इति तद्विषयेऽत्र किञ्चित् प्रस्तूयते । हे जगतः परमकारणरूप ! सदा विद्यमान प्रभो ! तुभ्यं नमस्कारः । हे चेतनस्वरूप ! सर्वलोकस्य आश्रय ! त्वां नमामि । हे मुक्तिप्रदातः ! अद्वैततत्त्व ! त्वां स्तौमि । हे शाश्वत, सर्वव्यापक, परब्रह्मन् ! तुभ्यं मे वारं वारं प्रणामाः सन्तु ।

हे प्रभो ! त्वमेव मे एकमात्रं शरणदाता, श्रेष्ठः, वरेण्यः चासि, एवं त्वमेव जगतः पालकः, स्वप्रकाशकः चासि । परमात्मन् ! त्वमेव एकमात्र जगत्कर्ता, जगत्पालकः, जगत्संहारकः चासि । त्वमेव सर्वश्रेष्ठः, वरिष्ठः, अचलः, विकाररहितः चासि ।

भगवन् ! त्वमेव भयेभ्योऽपि भयप्रदायकः, भीषणानामपि भीषणतमः, समस्तप्राणिनां गतिरूपः, पवित्राणामपि पवित्रतमः चासि । त्वं सर्वोच्चपदानामपि एकमात्रं नियन्ता, परेषु परतमः, रक्षकाणामपि रक्षकः चासि ।

हे ईश्वर ! अहं त्वामेव स्मरामि, त्वामेव भजामि, सर्वेषां साक्षिरूपं त्वामेव नमामि च । त्वम् एकमात्रं सत्यस्वरूपः, सर्वेषाम् आधारः, किञ्च स्वयं निराधारः चासि । संसाररूपे समुद्रे नौकारूपः सुरक्षकः त्वमेवासि । शरणदातः प्रभो ! त्वं मां स्वीकुरु ।

अस्मिन् विश्वब्रह्माण्डे त्वदपि श्रेष्ठः, द्वितीयश्च न कोऽपि, त्वमेव ब्रह्माण्डपतिः, नास्ति तव कोऽपि विग्रहः, कारणस्यापि कारणमसि । अतः त्वमेव सर्वस्योत्पादकः, अधिष्ठाता, शासकः, सर्वनियन्ता, स्वयम्भूः चासि ।

हे प्रभो ! त्वम् ईश्वराणामपि महेश्वरः, देवानामपि परमपूजनीयः परमदेवः, पतीनामपि परमाधिपतिः चासि । हे सर्वजगतः परमशासक ! अहं सदैव तव स्तुतिं, गुणगानञ्च करोमि, तथा तवोपकारं मनसा संस्मृत्य तुभ्यं कृतज्ञतां ज्ञापयामि ।

हे प्रभो ! त्वमेव मे वात्सल्यमयी जननी, मम पालनकर्ता जनकः, त्वमेव मे प्रियबन्धुः, सखा चासि । मम विद्वत्ता, मम धनं, परमपूजनीयः उपास्यदेवः इत्यादिकं सर्वमपि त्वमेवासि इति, शुभम् ।



हिमसंस्कृतवार्ता
असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# "परिपक्वता "

परिपक्वतायाः अर्थः अस्ति-- यदा भवन्तः जगतः परिवर्तनं त्यक्त्वा स्वयमेव परिवर्तनं आरभन्ते । परिपक्वतायाः अर्थः-- जनान् यथावत् स्वीकुर्वन्ति ।

परिपक्वतायाः अर्थः-- प्रत्येकं व्यक्तिः स्वस्थाने सम्यक् अस्ति इति भवन्तः अवगच्छन्ति । परिपक्वतायाः अर्थः-- यदा भवन्तः ग्रहणात् अधिकं दातुं विश्वसन्ति । परिपक्वतायाः अर्थः-- यदा भवतः सम्बन्धेभ्यः किमपि अपेक्षा नास्ति परन्तु त्यागस्य भावना स्वीकरोति । परिपक्वतायाः अर्थः-- भवन्तः जानन्ति यत् भवतः आत्मिकसुखं किम् अस्ति । तथैव यदा त्वं आवश्यकतायाः तथा च लोभस्य भेदं अवगच्छसि । परिपक्वतायाः अर्थः-- यदा त्वं कस्यचित् निष्पक्षभावेन प्रशंससि अन्तिमतः अतीव महत्वपूर्णम्-

"आन्तरिकसुखस्य सम्बन्धः भौतिक सुखेन सह न योज्यते ।"

**डा. वर्षा प्रकाश टोणगांवकर ©**
**पुणे / महाराष्ट्रम्**

हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये। अद्यतनं प्रथमं वृत्तं दिण्डुगल्-नगरस्य अस्ति, यत्र शल्यचिकित्सया कर्कटपीडातः मुक्तस्य काकस्य पुनः आकाशे उड्डयनं मया दृष्टम्।

**काव्या-** नमस्ते नन्दिनि। तस्य काकस्य आरोग्यावाप्त्या मया महती प्रसन्नता प्राप्ता।

अनन्तरं, सिक्किम्-प्रदेशस्य विद्यालये कश्चन सारमेयः शान्ततया प्रार्थनायां प्रविष्टः, तेन च अन्तर्जाले बहूनां जनानां मनांसि द्रवीकृतानि।

**नन्दिनी-** सत्यम्, अहम् अपि तस्य भक्तिं दृष्ट्वा विस्मिता जाता। अधुना बिहार-प्रदेशे ऊर्जासङ्कटकारणात् ग्राम्यमार्गेषु जनैः वृषभशकटानि पुनः चालितानि।

**काव्या-** वृषभशकटचालनेन प्राचीनकालस्य स्मृतिः जागरिता जाता, परं सङ्कटम् एतत् चिन्ताजनकम् अस्ति। कामेरून्-देशस्य कस्यचित् राजकीयाचारस्य कारणेन तद्देशीयः राजा न्यायपरीक्षणे संस्थापितः। अहम् अपि एतम् विषयम् पठितवती अस्मि।

**नन्दिनी-** अहो, तेन आचारेण दर्शितं यत् राजा अपि नियमाधीनः अस्ति। अद्यतनः वार्ता-कार्यक्रमः अत्रैव समाप्तः। श्वः पुनः मिलामः।